Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

( सान्वयगूर्जरभाषांतरसहीतं च )

# ॥ श्रीसुरसेनमहासेनचरित्रम् ॥

( मूळकर्ता—वर्धमानसूरी )

अन्वय सहीत भाषांतर कर्ता तथा छपावी प्रसिद्ध करनार पंडित हीरालाल हंसराज.

आ ग्रंथना अन्वय तथा भाषांतरना प्रसिद्ध कर्ताए सर्व हक स्वाधिन राख्या छे.

सने १९२९. मूल्य रु. ०—८—० सं. १९८५.

Printed at Jain Bhaskaroday Printing Press—JAMNAGAR.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीसूरसेनमहासेनचरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित गुजराती भाषांतर कर्ता पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

**रौद्रार्तधी-शस्त्रदान-पापशिक्षा-प्रमादिताः । अनर्थदण्डस्तत्त्यागः स्यात्तृतीयं गुणव्रतम् ॥ १ ॥**

अन्वयः—रौद्र आर्त धी शस्त्र दान पाप शिक्षा प्रमादिताः, अनर्थ दंडः, तत् त्यागः तृतीयं गुण व्रतं स्यात्. ॥ १ ॥

अर्थः-रौद्रध्यान, आर्तध्यान, शस्त्रो आपवां, अने पापकार्योनो उपदेश, तथा प्रमादपणुं, ए अनर्थ दंड छे, तेओनो जे त्याग करवो, ते त्रीजुं गुणव्रत कहेवाय. ॥ १ ॥

**अनर्थदण्डवीरामव्रतधीरा महोदयम् । लभन्ते शुभसंभारभासुराः सुरसेनवत् ॥ २ ॥**

अन्वयः—अनर्थ दंड वीराम व्रत धीराः, शुभ संभार भासुराः सूरसेनवत् महोदयं लभंते. ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अर्थः—अनर्थदंडविरमण नामना व्रतनुं ( पालन करवामां ) धैर्यवाळा, तथा पुण्यना समूहथी देदीप्यमान थयेला मनुष्यो सुर-सेननीपेठे म्होटो उदय पामे छे. ॥ २ ॥

**तथाहि देवपूजोद्यद्गन्धान्धैर्मधुपैर्मुहुः । गीतप्रशस्तिरस्ति श्रीबन्धुरा बन्धुरा पुरी ॥ ३ ॥**

अन्वयः–तथाहि–देव पूजा उद्यत् गंध अंधैः मधुपैः मुहुः गीत प्रशस्तिः, श्री बंधुरा बंधुरा पुरी अस्ति. ॥ ३ ॥

अर्थः–ते सूरसेनमहासेननुं उदाहरण कहे छे–जिनपूजामां बेहेकी रहेली सुगंधिमां आसक्त थयेला भमराओए वारंवार गायेली छे प्रशंसा जेनी, तथा लक्ष्मीथी मनोहर थयेली बंधुरानामनी नगरी छे. ॥ ३ ॥

**श्रीवीरसेन इत्युग्रवीरसेनाशिरोमणिः । वृत्तैः पवित्रैरश्यामस्तस्यामजनि भूधवः ॥ ४ ॥**

अन्वयः—तस्यां उग्र वीर सेना शिरः मणिः, पवित्रैः वृत्तैः अश्यामः श्री वीरसेनः इति भूधवः अजनि. ॥ ४ ॥

अर्थः—ते नगरीमां प्रचंड सुभटोना सैन्यनो मालिक, तथा निर्मल आचरणोथी उज्ज्वल श्रीवीरसेननामनो राजा हतो. ॥ ४॥

**अन्तरारिप्रहारेषु धर्मकाण्डाद्भुतौ सुतौ । सुरसेनमहासेनौ तस्याभूतामुभौ शुभौ ॥ ५ ॥**

अन्वयः—तस्य अंतर अरि प्रहारेषु धर्म कांड अद्भुतौ, सुरसेन महासेनौ उभौ शुभौ सुतौ अभूतां. ॥ ५ ॥

अर्थः—ते राजाने (कषायोरूपी) अंतरंग शत्रुओने मारवामां धर्मरूपी बाणोवडे आश्चर्य करावनारा, सुरसेन अने महासेननामना

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





बे उत्तम पुत्रो हता. ॥ ५ ॥

**उपमानोपमेयत्वमभिधानाभिधेयता । रूपे च साहचर्ये च व्यचार्यत तयोर्जनैः ॥ ६ ॥**

अन्वयः—तयोः रूपे च साहचर्ये च उपमान उपमेयत्वं, अभिधान अभिधेयता जनैः व्यचार्यत. ॥ ६ ॥

अर्थः—तेओना रूपमाटे तथा सहचारीपणामाटे (परस्पर) उपमा तथा उपमेयपणाने, अने अभिधान तथा अभिधेयपणाने लोको मनमां धारण करता हता. ॥ ६ ॥

**दृशौ सदवलोकेषु बाहू मोहादिमर्दने । चरणौ सच्चरित्रेषु तौ धर्मस्य व्यराजताम् ॥ ७ ॥**

अन्वयः—सदवलोकेषु धर्मस्य दृशौ, मोह आदि मर्दने बाहू, सत् चरित्रेषु चरणौ तौ व्यराजतां. ॥ ७ ॥

अर्थः—उत्तम कार्योने अथवा सज्जनोने जोवामां धर्मनी बन्ने आंखोसरखा, मोहआदिकनो नाश करवामां बे हाथसरखा, तथा उत्तम आचरणोमां बे पगोसरखा, ते बन्ने कुमारो शोभता हता. ॥ ७ ॥

**अजायत रसज्ञायामन्येद्युः श्वयथुः पृथुः । अकस्माद्विस्मयकरो महासेनस्य दुःसहः ॥ ८ ॥**

अन्वयः—अन्येद्युः महासेनस्य रसज्ञायां पृथुः, विस्मयकरः, दुःसहः श्वयथुः अकस्मात् अजायत. ॥ ८ ॥

अर्थः—एकदिवसे ते महासेनकुमारनी जिह्वामां, विस्तीर्ण, आश्चर्यकारक तथा न सहन थइ शके एवो सोजो अकस्मात् उत्पन्न थयो. ॥ ८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उपशान्त्यै व्यधुर्वैद्या यद्यदोषधमुच्चकैः । ववृधे तेन तेनापि जिह्वाशोफः स लोभवत् ॥ ९ ॥

अन्वयः–उपशांत्यै वैद्याः यत् यत् औषधं उच्चकैः व्यधुः, तेन तेन अपि सः जिह्वा शोफः लोभवत् ववृधे. ॥ ९ ॥

अर्थः–तेनी शांतिमाटे वैद्योए जे जे औषध अति उद्यमथी कर्या, ते ते औषधथी पण जिह्वानो ते सोजो लोभनीपेठे वृद्धि पामवा लाग्यो. ॥ ९ ॥

औषधं धर्म एवास्य युक्तमित्युक्तयस्ततः । तं वैद्या मुमुचुर्निःस्वं भुजंगं गणिका इव ॥ १० ॥

अन्वयः—अस्य औषधं धर्मः एव युक्तं, इति उक्तयः वैद्याः, गणिकाः निःस्वं भुजंगं इव, तं मुमुचुः. ॥ १० ॥

अर्थः—आनेमाटे हवे धर्मरूपी औषधज योग्य छे, एम कहीने वैद्योए, वेश्याओ जेम निर्धन आशकने तजी दे, तेम तेने तजी दीधो. (अर्थात् वैद्यो निराश थइ चाल्या गया.) ॥ १० ॥

क्रमेण कुथिता तस्य रसज्ञा राजजन्मनः । मक्षिकाणामनिर्वारसत्रागारत्वमाययौ ॥ ११ ॥

अन्वयः—क्रमेण तस्य राज जन्मनः कुथिता रसज्ञा, मक्षिकाणां अनिर्वार सत्र आगारत्वं आययौ. ॥ ११ ॥

अर्थः—अनुक्रमे ते राजपुत्रनी सडी गयेली जिह्वा, मक्षिकाओ माटे अटकावरहित दानशालापणाने प्राप्त थइ, (अर्थात् घणी मक्षिकाओ तेने हेरान करवा लागी.) ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उग्रदुर्गन्धभूः कान्तापितृमातृभिरप्यसौ । चण्डालपाटक इवाध्वगैर्दूराद्मुच्यत ॥ १२ ॥

अन्वयः-अध्वगैः चंडाल पाटकः इव, उग्र दुर्गंध भूः असौ, कांता पितृ मातृभिः अपि दूरात् अमुच्यत. ॥ १२ ॥

अर्थः—वटेमार्गुओ जेम कसाइवाडाने दूर छोडी दीये तेम भयंकर दुर्गंधना स्थानरूप एवा ते राजकुमारने (तेनी) स्त्रीए तथा मातापिताए पण दूर तजी दीधो. ॥ १२ ॥

तं तथाभूतमुद्वाव्य भ्रातृस्नेहवशंवदः । दुर्गन्धं दुःसहं जित्वा सुरसेनः समीपगः ॥ १३ ॥

रोगोऽसौ यावदस्यास्ति न किंचित्तावदाहरे । म्रियते यद्यनेनैष म्रियेऽनशनतस्ततः ॥ १४ ॥

इति न्यविशत भ्रातुरग्रे स दृढनिश्चयः । वीजयन्वसनान्तेन मक्षिका मुखपातिनीः ॥१५॥ त्रिभिर्विशेषकम् ॥

अन्वयः-तथाभूतं तं उद्वाव्य भ्रातृ स्नेह वशंवदः सुरसेनः दुःसहं दुर्गंधं जित्वा समीपगः, ॥ १३ ॥ यावत् अस्य असौ रोगः अस्ति, तावत् किंचित् न आहरे, यदि अनेन एषः म्रियते ततः अनशनतः म्रिये, ॥ १४ ॥ इति दृढ निश्चयः सः मुख पातिनीः मक्षिकाः वसन अंतेन वीजयन् भ्रातुः अग्रे न्यविशत. ॥ १५ ॥ त्रिभिर्विशेषकम् ॥

अर्थः-ए रीतनी दुर्गंधथी तेने एकाकी पडेलो जाणीने भाइना स्नेहने वश थयेलो ते सुरसेन ते दुःसह दुर्गंधनी दरकार कर्या विना तेनी पासेज बेसवा लाग्यो, ॥ १३ ॥ तथा ज्यांसुधी आनो आ रोग छे, त्यां सुधी मारे कंइ पण खावुं नथी, अने कदाच आ रोगथी ते मरी जाय, तो मारे पण अनशन करीने मरी जवुं, ॥ १४ ॥ एवो दृढ निश्चय करीने ते मुखमां पडती माखीओने



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बलना छेदाथी उडाडतोथको भाइनी पासेज बेसी रहेवा लाग्यो. ॥ १५ ॥ त्रिभिर्विशेषकं ॥

नमस्काराख्यमन्त्रेणाभिमन्त्र्य प्रासुकं पयः । तं मुहुः स्मारयंश्चास्य सिषेच रसनामसौ ॥ १६ ॥

अन्वयः–असौ नमस्कार आख्य मंत्रेण प्रासुकं पयः अभिमंत्र्य, मुहुः तं स्मारयन् अस्य रसनां सिषेच. ॥ १६ ॥

अर्थः—वळी ते सुरसेनकुमार नवकारनामना मंत्रथी प्रासुक जल मंत्रीने, तथा वारंवार ते नवकारमंत्रनु स्मरण करावतोथको तेनी जीह्वाने (ते जलवडे) सींचवा लाग्यो. ॥ १६ ॥

सेके सेके व्यथाशान्तिर्विशेषं समजायत । क्रमात्तस्य क्षुधार्तस्य कवले कवले यथा ॥ १७ ॥

अन्वयः–क्षुधा आर्तस्य यथा कवले कवले, (तथा) सेके सेके क्रमात् तस्य विशेषं व्यथा शांतिः समजायत. ॥ १७ ॥

अर्थः—क्षुधाथी पीडित थयेला मनुष्यने जेम कोळीए कोळीए शांति थाय छे, तेम (ते जलना) सिंचनथी अनुक्रमे तेने विशेष प्रकारे व्याधिनी शांति थवा लागी. ॥ १७ ॥

निर्व्यथं निर्व्रणं नीरुग्निर्गन्धं च सुगन्धि च । मुहूर्तात्तन्मुखं जज्ञे क्व न धर्मः प्रभावभाक् ॥ १८ ॥

अन्वयः–मुहूर्तात् तत् मुखं निर्व्यथं, निर्व्रणं, नीरुक्, च निर्गंधं, च सुगंधि जज्ञे, धर्मः क्व प्रभाव भाक् न? ॥ १८ ॥

अर्थः–(एरीते) एक मुहूर्तजेटला समयमांज तेनुं मुख व्याधिरहित, चांदांरहित, निरोगी, दुर्गंधविनानुं, अने सुगंधि थयुं, केमके धर्म क्यां प्रभावशाली नथी होतो? ॥ १८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





धर्मेणास्तः स रोगः श्राग्मुक्तो वैद्यगणेन यः । भानुच्छेद्यं तमश्छेत्तुं खद्योताः क किल क्षमाः ॥ १९ ॥

अन्वयः–यः वैद्य गणेन मुक्तः, सः रोगः श्राग् धर्मेण अस्तः, भानु च्छेद्यं तमः छेत्तुं किल खद्योताः क्व क्षमाः ? ॥ १९ ॥

अर्थः–जे रोगने वैद्योना समूहे तजी दीधो, ते रोगने तुरत धर्मे नष्ट कर्यो, केमके सूर्यथी नष्ट थनारां अंधकारने छेदवाने खरेखर पतंगीयांओ क्यांथी समर्थ थइ शके ? ॥ १९ ।

राहुमुक्तं रविमिव प्राप्तपूर्वच्छविच्छटम् । तं रोगमुक्तं वीक्ष्याभूल्लोकः सर्वोऽपि सोत्सवः ॥ २० ॥

अन्वयः—राहु मुक्तं रविं इव, रोग मुक्तं तं प्राप्त पूर्वच्छवि च्छटं वीक्ष्य सर्वः अपि लोकः सोत्सवः अभूत् . ॥ २० ॥

अर्थः–राहुथी मुक्त थयेला सूर्यनीपेठे, रोग रहीत थयेला ते राजकुमारने पूर्वनी पेठे शरीरनी (मनोहर) कांतिवाळो जोइने सर्व कोइ मनुष्यो आनंदित थया. ॥ २० ॥

विशेषतस्ततस्तारे धर्मभारे सहोदरौ । तौ बभूवतुरुद्भासौ शरदीवेन्दुभास्करौ ॥ २१ ॥

अन्वयः—ततः तौ, सहोदरौ, शरदि इंदु भास्करौ इव तारे धर्मभारे विषेषतः उद्भासौ बभूवतुः. ॥ २१ ॥

अर्थः–पछी ते बन्ने भाइओ शरदऋतुमां चंद्र अने सूर्यनीपेठे मनोहर जैनधर्म धारण करवामां विशेष प्रकारे तेजस्वी थया. ॥

श्रीभद्रबाहुराचार्योऽवधिज्ञानमधिष्ठितः । कदापि तत्पुरोद्यानं द्यामिवेन्दुरभूषयत् ॥ २२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः—कदापि अवधि ज्ञानं अधिष्ठितः श्रीभद्रबाहुः आचार्यः, इन्दुः द्यां इव तत् पुर उद्यानं अभूषयत्. ॥ २२ ॥

अर्थः—(एवामां) एक दिवसे अवधिज्ञानवाळा श्रीभद्रबाहुनामना आचार्य, चंद्र जेम आकाशने, तेम नगरीना उद्यानने विभूषित करवा लाग्या. ॥ २२ ॥

**प्रदक्षिणात्रयेणोपश्रेमतुर्नेमतुश्च तम् । उपविश्य ततो धर्मदेशनां पपतुश्च तौ ॥ २३ ॥**

अन्वयः—ततः तौ तं प्रदक्षिणा त्रयेण उपश्रेमतुः, च नेमतुः, च उपविश्य धर्मदेशनां पपतुः. ॥ २३ ॥

अर्थः—पछी ते बन्ने भाइओए आचार्यमहाराजने त्रण प्रदक्षिणा करी, वांद्या, तथा (त्यां) बेसीने (तेमनी) धर्मदेशनानुं पान कर्युं. (अर्थात् तेमनो धर्मोपदेश सांभळ्यो.) ॥ २३ ॥

**सुरसे सुरसेनेन निपीते देशनामृते । अपृच्छयत गुरुर्भ्रातृरसनारोगकारणम् ॥ २४ ॥**

अन्वयः–सुरसेनेन सुरसे देशना अमृते निपीते, गुरुः भ्रातृ रसना रोग कारणं अपृच्छयत. ॥ २४ ॥

अर्थः–(पछी) ते सुरसेने उत्तमरसवाळुं देशनारूपी अमृत पीधाबाद गुरुमहाराजने (पोताना) भाइनी जिह्वाना रोगनुं कारण पूछ्युं. ॥ २४ ॥

**स च प्रवचनक्षीरार्णववीचीनिभं वचः । उपाददे भवदवोद्भवक्लेशहरं गुरुः ॥ २५ ॥**

अन्वयः–च सः गुरुः प्रवचन क्षीर अर्णव वीची निभं, भव दव उद्भव क्लेश हरं वचः उपाददे. ॥ २५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः–त्यारे ते गुरुमहाराज आगमोरूपी क्षीरसमुद्रना मोजां सरखुं, तथा संसाररूपी दावानलथी उत्पन्न थयेलां कष्टने हरनारुं वचन बोल्या के, ॥ २५ ॥

**भूभूषाभूतमाहूतपुरुहूतपुरप्रभम् । पुरं मणिपुरं नाम विद्यते विश्वविश्रुतम् ॥ २६ ॥**

अन्वयः–भू भूषा भूतं, आहूत पुरुहूत पुर प्रभं, विश्व विश्रुतं मणिपुरं नाम पुरं विद्यते. ॥ २६ ॥

अर्थः—पृथ्वीना अलंकारसरखुं, तथा इंद्रनी नगरीनी कांतिने धारण करनारुं, अने जगतमां प्रख्यात मणिपुर नामनुं नगर छे.

**तस्मिन्कश्मलितारातिवदनो मदनो भटः । बभूव भगवद्धर्मसुधाम्बुधिसुधाकरः ॥ २७ ॥**

अन्वयः–तस्मिन् कश्मलित अराति वदनः, भगवत् धर्म सुधा अंबुधि सुधाकरः मदनः भटः बभूव. ॥ २७ ॥

अर्थः—ते नगरमां झांखां करेल छे शत्रुओना मुखो जेणे, तथा जिनेश्वरप्रभुना धर्मरूपी अमृतना महासागरने (वृद्धिपमाडवामां) चंद्रसरखो मदननामनो सुभट (रहेतो) हतो. ॥ २७ ॥

**तुल्याकृती तुल्यशक्तो तुल्यार्थौ तुल्यतेजसौ । धीरवीराभिधौ तस्य सुतौ जातौ भुजाविव ॥ २८ ॥**

अन्वयः—तस्य भुजौ इव, तुल्य आकृती, तुल्य शक्ती, तुल्य अर्थौ, तुल्य तेजसौ, धीर वीर अभिधौ सुतौ जातौ. ॥ २८ ॥

अर्थः–तेना बन्ने हाथनीपेठे, सरखा आकारवाळा, सरखां बळवाळा, सरखी समृद्धिवाळा, अने सरखां तेजवाळा धीर अने वीर-नामना बे पुत्रो थया. ॥ २८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**जिनप्रवचनस्वादानन्दामन्दसुधारसौ । तौ भवाहिभुवा ग्रस्तौ न मोहविषमूर्छया ॥ २९ ॥**

अन्वयः—जिन प्रवचन स्वाद आनंद अमंद सुधा रसौ तौ, भव अहि भुवा मोह विषमूर्छया न ग्रस्तौ. ॥ २९ ॥

अर्थः–जैन आगमोना स्वादना आनंदरूपी अति अमृतरसमां मग्न थयेला एवा तेओ संसाररूपी सर्पथी उत्पन्न थयेली मोहरूपी विषनी मूर्छाथी ग्रस्त थया नही. ॥ २९ ॥

**कदाप्येतौ गतावात्मोद्याने ददृशतुर्मुनिम् । स्वमातुलं वसन्ताख्यं पुंवृतं पतितं भुवि ॥ ३० ॥**

अन्वयः–कदापि आत्म उद्याने गतौ एतौ वसंत आख्यं स्व मातुलं मुनिं पुं वृतं भुवि पतितं ददृशतुः ॥ ३० ॥

अर्थः–एक वखते पोताना बगीचामां गयेला एवा तेओ बन्नेए वसंत नामना पोताना मामा मुनिराजने पुरुषोथी वींटायेला तथा पृथ्वीपर पडेला जोया. ॥ ३० ॥

**किमभूत्किमभूदेतदिति व्याकुलचेतसि । धीरेऽथ पृच्छति पुमानेकस्तत्राश्रुमुग्जगौ ॥ ३१ ॥**

अन्वयः—अथ किं अभूत्? किं अभूत्? इति व्याकुल चेतसि धीरे पृच्छति, तत्र एकः पुमान अश्रुमुग् जगौ. ॥ ३१ ॥

अर्थः–पछी (अरे!) आ शुं थयुं? शुं थयुं? एम व्याकुल हृदयथी धीरे पूछवाथी, त्यां एक माणसे आंखोमां आंसुओ लावी कह्युं के, ॥ ३१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**प्रतिमास्थमिमं साधुं दष्ट्वैको दुष्टपन्नगः । दुर्गे नृपापराधीव प्रविष्टोऽस्मिन्महाबिले ॥ ३२ ॥**

अन्वयः-प्रतिमास्थं इमं साधुं दष्ट्वा एकः दुष्ट पन्नग', नृप अपराधी दुर्गे इव अस्मिन् महाबिले प्रविष्टः. ॥ ३२ ॥

अर्थः—काउसगमां उभेला आ साधुने दंश मारीने एक दुष्ट सर्प, राजानो गुन्हेगार जेम किल्लामां भराइ बेसे, तेम आ म्होटां बिलमां भराइ बेठो छे. ॥ ३२ ॥

**अथ मातुलमोहेन क्रुधा धीरानुजोऽभ्यधात् । रे रङ्काः किमसौ नश्यन्नहिः पापी हतो न हि ॥ ३३ ॥**

अन्वयः-अथ मातुल मोहेन धीर अनुजः क्रुधा अभ्यधात्. रे रंकाः ! असौ नश्यन् पापी अहिः हि किं न हतः ? ॥ ३३ ॥

अर्थः-(त्यारे) मामाना मोहथी ते धीरना न्हाना भाइ वीरे क्रोधथी कह्युं के, अरे नामर्दो ! ते नाशी जता पापी सर्पने खरेखर (तमोए) केम मारी न नाख्यो ? ॥ ३३ ॥

**धीरस्तमभ्यधात्सर्पे गते जीवति कर्मतः । हहा महात्मन्किं पापं मुधा बध्नासि जिह्वया ॥ ३४ ॥**

अन्वयः-धीरः तं अभ्यधात्, हहा ! महात्मन् ! कर्मतः सर्पे जीवति गते, मुधा जिह्वया पापं किं बध्नासि ? ॥ ३४ ॥

अर्थः-त्यारे धीरे तेने कह्युं के, अरे ! भलामाणस ! कर्मयोगे ते सर्प जीवतो चाल्यो गयो छे, हवे फोकट जीभथी शामाटे (तुं) पाप बांधे छे ? ॥ ३४ ॥

**क्रुधाभ्यधीत वीरोऽपि दुष्टे दष्टमहामुनौ । तस्मिन् हतेऽपि धर्मः स्याद्धतिवाचा क पातकम् ॥ ३५ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयः–वीरः अपि क्रुधा अभ्यधीत, दष्ट महामुनौ तस्मिन् दुष्टे हते अपि धर्मः स्यात्, इति वाचा पातकं क्व ? ॥ ३५ ॥

अर्थः—(त्यारे) ते वीरे पण क्रोधथी कह्युं के, जेणे (आवा) महामुनिराजने दंश मार्यो छे, एवा ते दुष्ट सर्पने मारवाथी तो धर्म थाय, (तेने) मारवानी फक्त वात करवाथीज वळी पाप क्यां वळगी जवानुं हतुं ? ॥ ३५ ॥

**क्षत्रधर्मो ह्ययं साधुपालने दुष्टनिग्रहे । इत्यसत्यं यदि ततो मज्जिह्वामेतु पातकम् ॥ ३६ ॥**

अन्वयः—अत्र हि साधु पालने, दुष्ट निग्रहे क्षत्र धर्म, इति यदि असत्यं, ततः मत् जिह्वां पातकं एतु. ॥ ३६ ॥

अर्थः–आ जगतमां खरेखर साधुओनुं पालन करवुं, अने दुष्टोनो नाश करवो, ए क्षत्रिओनो धर्म छे, जो ते वात असत्य होय, तो भले मारी जिह्वाने पाप वलगी जाय. ॥ ३६ ॥

**धीरस्त्वचिन्तयन्वाचं तस्यापारकृपारसः । यतीन्द्रं जीवयामास मणिमन्त्रौषधीबलात् ॥ ३७ ॥**

अन्वयः—धीरः तु तस्य वाचं अचिंतयन अपार कृपा रसः मणि मन्त्र ओषधी बलात् यति इन्द्रं जीवयामास. ॥ ३७ ॥

अर्थः—धीरे तो तेना वचननी दरकार कर्या विना अत्यंत कृपारसमां मग्न थइने, मणि, मन्त्र तथा औषधीओनां बलथी ते मुनिराजने जीवाड्या. ॥ ३७ ॥

**यतीन्द्रजीवनात्प्रीतिं महानन्दस्य वर्णिकाम् । धारयन्तौ भटस्यैतौ सुतौ सर्वजनस्तुतौ ॥ ३८ ॥**

**पालयन्तौ शुभं धर्मं ज्वालयन्तौ च पातकम् । क्षालयन्तौ च कीर्त्या स्वं सुचिरं तौ ननन्दतुः ३९ युग्मं**



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयः-यतींद्र जीवनात् महानंदस्य वर्णिकां प्रीतिं धारयंतौ, सर्व जन स्तुतौ, भटस्य एतौ सुतौ ॥ ३८ ॥ शुभं धर्मं पालयंतौ, च पातकं ज्वालयंतौ, च कीर्त्या स्वं क्षालयंतौ, तौ सुचिरं ननंदतुः ॥ ३९ ॥ युग्मं ॥

अर्थः-ते मुनिराजने जीवाडवाथी महान् आनंदना नमुनारूप प्रीतिने धारण करतां, तथा सर्व लोकोशी प्रशंसा पामेला, सुभटना ते बन्ने पुत्रो, ॥ ३८ ॥ मनोहर धर्म पालताथका, तथा पापोने बालता थका, अने कीर्तिवडे पोताना आत्माने निर्मल करताथका तेओ घणा काळ सुधी समृद्धि पाम्या. ॥ ३९ ॥

**धीरः क्रमेण पूर्णायुः सुरसेन भवानभूत् । अनालोचिततादृग्वाग्वीरस्त्वेष तवानुजः ॥ ४० ॥**

अन्वयः-(हे) सुरसेन! क्रमेण पूर्णायुः धीरः भवान् अभूत्, अनालोचित तादृग् वाग् वीरः तु एषः तव अनुजः ॥ ४० ॥

अर्थः-हे सुरसेन! अनुक्रमे आयु संपूर्ण थयाबाद धीरनो जीव तुं थयो, अने तेवां वचननी आलोचना नही करीने वीरनो जीव आ तारो न्हानो भाइ थयो छे. ॥ ४० ॥

**असाध्यः सर्ववैद्यानामनवद्यौषधीविदाम् । सर्पप्रहतिवाक्पापाज्जिह्वारोगोऽस्य जातवान् ॥ ४१ ॥**

अन्वयः-अनवद्य ओषधी विदां सर्व वैद्यानां असाध्यः अस्य जिह्वा रोगः सर्प प्रहतिवाक् पापात् जातवान्. ॥ ४१ ॥

अर्थः-(वळी) निर्मल औषधीओने जाणनारा एवा सर्व वैद्यो पण जेनो उपाय न करी शक्या, एवो आ महासेनने जीभनो रोग सर्पने मारवाना वचनना पापथी थयो हतो. ॥ ४१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यतिसंजीवनादेव लब्धरुग्भङ्गलब्धिना । निरासि रसनारोगो महासेनस्य स त्वया ॥ ४२ ॥

अन्वयः—यति संजीवनात् एव लब्ध रुग् भंग लब्धिना त्वया महासेनस्य सः रसना रोगः निरासि. ॥ ४२ ॥

अर्थ.—मुनिने जीवाडवाथीज प्राप्त थयेल छे रोगो मटाडवानी लब्धि जेने, एवा तें महासेननो ते जीभसंबंधी रोग दूर कर्यो. ४२

इति ज्ञात्वा स्ववृत्तान्तं जातजातिस्मृती तदा । सुरसेनमहासेनौ भवार्तौ भेजतुर्व्रतम् ॥ ४३ ॥

अन्वयः—इति स्व वृत्तांतं ज्ञात्वा जात जाति स्मृती सुरसेन महासेनौ तदा भव आर्तौ व्रतं भेजतुः. ॥ ४३ ॥

अर्थः—एवीरीतनुं पोतानुं वृत्तांत जाणीने थयेल छे जातिस्मरण ज्ञान जेओने, एवा ते सुरसेन अने महासेने तेज वखते संसारथी वैराग्य पामीने दीक्षा लीधी. ॥ ४३ ॥

व्रतं व्रततिवत्सिक्त्वा तौ चारुचरितामृतैः । धर्मप्रसूनजं मुक्तिफलं कालादवापतुः ॥ ४४ ॥

अन्वयः—तौ व्रततिवत् व्रतं चारु चरित अमृतैः सिक्त्वा कालात् धर्म प्रसूनजं मुक्ति फलं अवापतुः. ॥ ४४ ॥

अर्थः—पछी तेओ बन्ने वेलडीनीपेठे ते चारित्रने मनोहर आचरणोरूपी अमृतवडे सींचीने, समय आव्ये धर्मरूपी पुष्पमांथी उत्पन्न थयेलां मुक्तिरूपी फलने प्राप्त थया. ॥ ४४ ॥

सुरसेनमहासेनदृष्टान्तेनामुना जनाः । अनर्थदण्डं दुःखौघहेतुं त्यजत दूरतः ॥ ४५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

—हे लोको! आ सुरसेन तथा महासेनना दृष्टांतथी दुःखोना समूहना कारणरूप अनर्थदंडने दूरथीज तजी आपो ? ॥ ४५ ॥

॥ एरीते अनर्थदंड व्रतना संबंधमां सुरसेन महासेननी कथा कही. ॥

॥ इति अनर्थदंडविरमणव्रतमाहात्म्योपदर्शने सुरसेनमहासेनचरित्रं समाप्तं ॥ श्रीरस्तु ॥

आ चरित्र श्रीवासुपूज्यचरित्रनामनामहाकाव्यमांथी स्वपरनाश्रेयने माटे तेना अन्वय तथा गुजरातो भाषांतर करी जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे पोताना श्रीजैनभास्करोदय प्रीन्टींग प्रेसमां छापी प्रसिद्ध कर्युं छे ॥ श्रीरस्तु ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीसुरसेनमहासेनचरित्रं समाप्तम् ॥

For Private And Personal Use Only